# Shri Ganeshakundatirtha Stotram

# શ્રીગણેશકુણ્ડતીર્થસ્તોત્રમ્

## Document Information

Text title : Shri Ganeshakundatirtha Stotram

File name : gaNeshakuNDatIrthastotram.itx

Category : ganesha, mudgalapurANa, stotra, tIrthakShetra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 24 | 6.24 2-19||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીગણેશકુણ્ડતીર્થસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
બ્રહ્મોવાચ ।
નમામિ તીર્થં ગણનાયકસ્ય ગણેશકુણ્ડં ગણનાતિગં ચ ।
અનન્તતીર્થપ્રભવં પુરાણં સંસેવિનાં બ્રહ્મપ્રદં નિજાત્મ્યમ્ ॥ ૨॥
અભેદભેદાદિવિહીનરૂપં ચતુષ્પદં પઞ્ચમમાદ્યભૂતમ્ ।
ગણેશમાયાકૃતદૃશ્યભાવં નમામિ કૈવલ્યઘનં પરેષામ્ ॥ ૩॥
ભવત્પ્રસૂતં ચ તુરીયમાત્મ્યં ભવેદરૂપં કિલ તીર્થકાનામ્ ।
અહં વિશુદ્ધોઽપિ ચ દર્શનેનાઽભવં કૃતબ્રહ્મકમણ્ડલુસ્થમ્ ॥ ૪॥
તદેવ ત્રૈગુણ્યમયં બભૂવ ભાગીરથીસ્થં રવિજામયં ચ ।
સરસ્વતીસ્થં ચ તતઃ પ્રસૂતાઃ સરિત્સમૂહા ભુવનેષુ સંસ્થાઃ ॥ ૫॥
સ્નાનેન પાપં વિનિહત્ય સર્વા નદ્યો નરાણામથ પાપયુક્તાઃ ।
નિત્યં જલે તે વિનિમજ્ય શુદ્ધા આયાન્તિ સ્વસ્થાનમઘાપહારિ ॥ ૬॥
પ્રયાગતીર્થે મરણેન જન્તુર્મનીષિતં તીર્થવરે લભેદ્વૈ ।
તવાવલોકેન ગણેશકુણ્ડ તદેવ સદ્યો લભતે સકૃચ્ચેત્ ॥ ૭॥
વાચઃ પરં તે જલબિન્દુજેઽહં સ્પર્શે ભવં કિં પ્રવદામિ પુણ્યમ્ ।
સાક્ષાદ્ગણેશાઙ્કુશઘાતજં તન્નમામિ કુણ્ડં ગણનાયકસ્ય ॥ ૮॥
ધન્યોઽહમેવં તવ દર્શનેન સ્પર્શેન તોયસ્ય નિમજ્જનેન ।
તોયે તથા તે ચ મહાનુભાવં બ્રહ્મૈવ તુષ્ટં ચ નમો નમસ્તે ॥ ૯॥
ત્વદીયતીરે મરણં વરિષ્ઠં સુમઙ્ગલં બ્રહ્મમયપ્રદં તત્ ।
વિના શ્રમેણૈવ નરા લભન્તે શુકાદિકાનાં પદમત્ર ચિત્રમ્ ॥ ૧૦॥
ત્વત્તોયજસ્પૃષ્ટિરહો મમાસ્તુ સ્નાનં તુ પાનં ચ સદાવલોકઃ ।
કિં વર્ણયામ્યેવ ગણેશકુણ્ડ સ્વલ્પજ્ઞભાવાત્તુ નમો નમસ્તે ॥ ૧૧॥
(ફલશ્રુતિઃ)
ભૃશુણ્ડ્યુવાચ ।
સ્તોત્રં ગણેશકુણ્ડસ્ય યઃ પઠિષ્યતિ માનવઃ ।

ભુક્તિં મુક્તિં લભેત્ સોઽપિ શ્રદ્ધયા બ્રહ્મભૂયકમ્ ॥ ૧૨॥
ઇદં બ્રહ્મકૃતં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
યત્ર કુત્ર સ્થિતાયાપિ ભક્ત્યા ભવતિ પાઠતઃ ॥ ૧૩॥
બ્રહ્મા તતો ગણેશાનં જગામ હર્ષસંયુતઃ ।
પૂજ્ય સ્તુત્વા મહેશાનાઃ પ્રદક્ષિણપરોઽભવત્ ॥ ૧૪॥
પાદસ્પર્શેન તસ્યાપિ કમણ્ડલુજલૈર્યુતઃ ।
ન્યુબ્જતામગમત્તત્ર નદી તસ્માદજાયત ॥ ૧૫॥
તતઃ પ્રણમ્ય વિઘ્નેશં યોગમાયાસમન્વિતઃ ।
સરિતં તાં ચકર્ષાઽસૌ પુનર્બ્રહ્મા કમણ્ડલૌ ॥ ૧૬॥
જગાદ ગણરાજશ્ચ તતસ્તં હર્ષસંયુતઃ ।
મા ગૃહ્ણીષ્વ વિધાતસ્ત્વં સર્વતીર્થમયીં નદીમ્ ॥ ૧૭॥
મમ સેવાર્થમત્યન્તલાલસા નિત્યમાભજેત્ ।
મદિચ્છયા નદી જાતા મત્ક્ષેત્રે સર્વપાવની ॥ ૧૮॥
તતસ્તં પ્રણતો ભૂત્વા બ્રહ્મા શોકસમન્વિતઃ ।
જગાદ તીર્થહીનોઽહં ભવિષ્યમિ ગજાનન ॥ ૧૯॥

ઇતિ શ્રીગણેશકુણ્ડતીર્થસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૨૪ । ૬.૨૪ ૨-૧૯॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 24 . 6.24 2-19..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganeshakundatirtha Stotram*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*